শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৬

*ৱিরাডদেহস্য জগদাত্মত্ৱৱর্ণনম্*

এৱং চতুর্দশজগন্মযতাং গতস্য
পাতালমীশ তৱ পাদতলং ৱদন্তি।
পাদোর্ধ্ৱদেশমপি দেৱ রসাতলং তে
গুলফদ্ৱযং খলু মহাতলমদভুতাত্মন্॥ ১॥

জঙ্ঘে তলাতলমথো সুতলং চ জানূ
কিঞ্চোরুভাগযুগলং ৱিতলাতলে দ্ৱে।
ক্ষোণীতলং জঘনমম্বরমঙ্গ নাভি-
র্ৱক্ষশ্চ শক্রনিলযস্তৱ চক্রপাণে॥ ২॥

গ্ৰীৱা মহস্তৱ মুখং চ জনস্তপস্তু
ফালং শিরস্তৱ সমস্তমযস্য সত্যম্।
এৱং জগন্মযতনো জগদাশ্ৰিতৈর-
প্যন্যৈর্নিবদ্ধৱপুষে ভগৱন্ নমস্তে॥ ৩॥

ত্ৱদব্ৰহ্মরন্ধ্রপদমীশ্ৱর ৱিশ্ৱকন্দ
ছন্দাংসি কেশৱ ঘনাস্তৱ কেশপাশাঃ।
উল্লাসি চিল্লিযুগলং দ্রুহিণস্য গেহং
পক্ষ্মাণি রাত্ৰিদিৱসৌ সৱিতা চ নেত্ৰে॥ ৪॥

নিশ্শেষৱিশ্ৱরচনা চ কটাক্ষমোক্ষঃ
কর্ণৌ দিশোশ্ৱিযুগলং তৱ নাসিকে দ্ৱে।
লোভত্ৰপে চ ভগৱন্নধরোত্তরোষ্ঠৌ
তারাগণাশ্চ দশনাঃ শমনশ্চ দংষ্ট্ৰা॥ ৫॥

www.prapatti.com

মাযা ৱিলাসহসিতং শ্বসিতং সমীৰো
জিহ্বা জলং ৱচনমীশ শকুন্তপঙ্ক্তিঃ।
সিদ্ধাদযস্সৱৰগণা মুখৰন্ধ্ৰমগ্নি-
ৰ্দেৱা ভুজাঃ স্তনযুগং তৱ ধৰ্মদেৱঃ॥ ৬ ॥

পৃষ্ঠং ত্বধৰ্ম ইহ দেৱ মনস্সুধাংশু-
ৰৱ্যক্তমেৱ হৃদযাম্বুজমম্বুজাক্ষ।
কুক্ষিস্সমুদ্ৰনিৱহা ৱসনং তু সন্ধ্যে
শেফঃ প্ৰজাপতিৰসৌ ৱৃষণৌ চ মিত্ৰঃ॥ ৭ ॥

শ্ৰোণীস্থলং মৃগগণাঃ পদযোৰ্নখাস্তে
হস্ত্যুষ্ট্ৰসৈন্ধৱমুখা গমনং তু কালঃ।
ৱিপ্ৰাদিৱৰ্ণভৱনং ৱদনাব্জবাহু-
চাৰূৰুযুগ্মচৰণং কৰুণাম্বুধে তে॥ ৮ ॥

সংসাৰচক্ৰমযি চক্ৰধৰ ক্ৰিযাস্তে
ৱীৰ্যং মহাসুৰগণোঽস্থিকুলানি শৈলাঃ।
নাড্যস্সৰিতসমুদযস্তৰৱশ্চ ৰোম
জীযাদিদং ৱপুৰনিৰ্ৱচনীযমীশ॥ ৯ ॥

ঈদৃগজগন্মযৱপুস্তৱ কৰ্মভাজাং
কৰ্মাৱসানসমযে স্মৰণীযমাহুঃ।
তস্যান্তৰাত্মৱপুষে ৱিমলাত্মনে তে
ৱাতালযাধিপ নমোঽস্তু নিৰুন্ধি ৰোগান্॥ ১০ ॥

**********



www.prapatti.com